International Journal of Sanskrit Research 2021; 7(1): 155-157

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 155-157
© 2021 IJSR
www.anantaajournal.com
Received: 25-11-2020
Accepted: 27-12-2020

**Dr. N Kannan**
Professor & Head,
Department of Oriental Studies & Research,
SASTRA Deemed to be University, Thanjavur, Tamilnadu, India.

**Sri P Sathyanarayana**
Research scholar,
Department of Oriental Studies & Research,
SASTRA Deemed to be University, Thanjavur, Tamilnadu, India.

**Corresponding Author:**
**Dr. N Kannan**
Professor & Head,
Department of Oriental Studies & Research,
SASTRA Deemed to be University, Thanjavur, Tamilnadu, India.

# वेदार्थसङ्ग्रहे मोक्षहेतुनिरूपणम्

**Dr. N Kannan and Sri P Sathyanarayana**

## भूमिका

श्रीरामानुजाचार्याः विशिष्टाद्वैतसिद्धान्तविजयध्वजाः 'वेदार्थसंग्रहं' नाम ग्रन्थरत्नं मुमुक्षूणां निरतिशयकल्याणार्थं निर्मितवान्, यस्मिन् ग्रन्थे संसारस्वरूपं, जीवबन्धहेतुः, मोक्षहेतुश्च सुकरं संगृहीतानि। एतदधिकृत्य अस्मिन् शोधकपत्रे विमृश्यतेतराम्।।

जीवबन्धहेतुः संसारस्वरूपं मोक्षहेतुश्च वेदार्थसङ्ग्रहे एवं सङ्गृहीतानि । "अत्रेदं सर्वशास्त्रहृदयम्- जीवात्मानः स्वयमसङ्कुचितापरिच्छिन्ननिर्मलज्ञानस्वरूपाः सन्तः कर्मरूपाविद्यावेष्टिताः तत्तत्कर्मानुरूपज्ञानसङ्कोचमापन्नाः ब्रह्मादिस्तम्बपर्यन्तविविधविचित्रदेहेषु प्रविष्टाः तत्तद्देहोचितलब्धज्ञानप्रसराः तत्तद्देहात्माभिमानिनः तदुचितकर्माणि कुर्वाणाः तदनुगुणसुखदुःखोपभोगरूपसंसारप्रवाहं प्रतिपद्यन्ते । एतेषां संसारमोचनं भगवत्प्रपत्तिमन्तरेण नोपपद्यते इति। [1] तथा भक्तिरपि संसारमोचने कारणीभूता । तथाच निरन्तरचिन्ताभ्यासरूपयोः भक्तिप्रपत्त्योः प्रत्येकं मोक्षहेतुत्वं वर्तते ।।

तत्र कस्य मोक्षःइति जिज्ञासा भवति । संसारिद्वैविध्यात् । तथाहि- केचित्- संसारी द्विविधः नित्यसंसारी, भाविसंसारविरहश्चेति इत्याहुः । न च नित्यसंसारिणः स्वीकारे "अहम् किं तादृशः स्याम्' इति शंकया मोक्षोपाये प्रवृत्तिः कस्यचित् न स्याद् इति वाच्यम् । उपायविधानशास्त्रार्थनिश्चयात् स्वस्य च तदानुगुण्यदर्शात् निःसंशयोऽपि कश्चित् प्रवर्तेत इति कथनात् । नो चेत्, अहमन्त्यमुक्तः स्याम्, यदि मम उपायानुष्ठानं विफलम् इति कोऽपि न प्रवर्तेत इति प्रतिबन्दिः (प्रतिबन्दी ?) प्रसजति । लीलाविभूतेः रक्षणार्थमहमेव अवशिष्टो गणितश्चेत् मोक्षार्थप्रयत्नो व्यर्थः किलेति कश्चिदपि न प्रयतेत इति प्रष्टुरभिप्रायः । ।

अपरे तु - नित्यसंसारित्वपक्षो न युक्त इत्याहुः । अस्मिन् पक्षे निःशेषं जीवानां मुक्तौ लीलाविभूतेरेवासत्वप्रसङ्ग इति प्रश्नो भवति। पूर्वस्मिन् पक्षे केचिन्नित्यसंसारिणश्चेद् भगवतः निरुपाधिकदयावत्त्वं भज्येत इति प्रश्नः । तत्पक्षे नित्यं केषुचित् जीवेषु दयाभावः तत्कर्मानुगुण्येन स्वीक्रियत इति न दोष इति समाधिः । अपरेषां पक्षे स्वेच्छया लीलाविभूतेरुपरतिः स्वीकार्या इति न दोषः । इदं पक्षद्वयमपि सिद्धान्ते वर्तते । निर्विशेषात्मैक्यवादे हि बन्धमोक्षयोरविशेषः प्रसज्यते। तत्त्वत इदानीमपि निरस्ताविद्यत्वात् । अतत्त्वतः तदानीमपि तद्व्यवहारोपपत्तेः । व्यपदिश्यते हि शुकादिषु मुक्तेष्वपि हि जग्ति संसारः । इति वेदान्तदेशिकाः [2]।।

जीवस्य संसारः सोपाधिकः । उपाधिश्च कर्माविद्यादिः । असंसारी द्विविधः- संसारात्यन्ताभाववान् प्रध्वस्तसंसारश्च । प्रथमो नित्यसूरिः ग्रुडादिः । द्वितीयस्तु मुक्तः । नित्यसूरिसद्भावे "सदा पश्यन्ति सूरयः' इति सदापश्यदनेकद्रष्टृविशिष्टस्थानविधायकं वाक्यमेव प्रमाणम्।।

ज्ञानविशेषः

भक्तिरूपापन्नोपासनवेदध्यानादिश्ब्दवाच्योऽसकृदावृत्तोऽन्वहमाप्रयाणात् अनुवर्तमानः। केवलं वाक्यात् जायमानं वाक्यार्थज्ञानं मोक्षहेतुः न भवति । तस्याविधेयत्वात् । तावता मोक्षादरर्शनाच्च । तदुक्तमापस्तम्बेन बुद्धेः क्षेमप्रापण्म् । तच्छास्त्रैः विप्रतिषिद्धम् । बुद्धेचेत् क्षेमप्रापण्म् इहैव न दुःखमुपलभ्येत' इति । विशिष्टदेशवास- व्रतविशेष- वैष्णवसंश्रयादेः ज्ञानयोग-कर्मयोगयोश्च परम्परया मोक्षसाधनत्वम् । अत्रोक्तः वैष्णवसंश्रयः -

"पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः ।
तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम् ॥
इत्युक्तप्रपदनरूपवैष्णवसमाश्रयणाद्भिन्नः ।

"परम्परया' इत्यस्य उपासनशेषत्वेन इत्यर्थः । उपासनं प्रत्यपि "अविद्यया मृत्युं तीर्त्वा' "धर्मेण पापमनुवदति' इत्यादिश्रुतिसिद्धविद्योत्पत्तिविरोधिकर्मनिरावरकत्ववत्- सत्कर्म सन्निपत्योपकारकम् । श्मदमादिकमपि चित्तैकाग्र्यहेतुत्वाद् उपासनाङ्गमेव ।

यज्ञादिकर्मापेक्षा विद्या । सा च तत्तद्वर्णाश्रमोचितानुष्ठानसापेक्षेति यावत् । एषां कर्मणां ज्ञानविरोधित्वात् कथं तदङ्गत्वम् इति न शंक्ययम् । "ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र इन्द्रश्ब्दस्य[3] यथा गार्हपत्यार्थकत्वम् । यथा वा प्रतर्दनविद्यायामिन्द्रश्ब्दस्य परमात्मपरत्वम् । तथाऽग्नीन्द्रादिशब्दानां परमात्मपरत्वात् कर्मानुष्ठाने ऐकान्त्यविरोधाभावेन अङ्गाङ्गिभावसमर्थनात्। एवं फलाभिसन्धिरहितस्य कर्मण्ः भगवत्प्रीत्यर्थस्य विद्यार्थत्वेऽपि विरोधाभावः ।।

एवं ब्रह्मविद्यायां तत्तद्वर्णाश्रमनिष्ठत्रैवर्णिकमनुष्यदेवासुराणां भवति अधिकारः स्त्रीविधुराणामपि अधिकारः जप- उपवासादियुक्तानां भवत्येव । सर्वासां स्त्रीणामधिकारो नास्ति । मैत्रेयीप्रभृतीनामधिकारः युगान्तर- क्वाचित्कविषयः। नैष्ठिकादिपरिभ्रष्टानां नास्त्येवाधिकारः । एते च विषयाः स्पष्टं सूत्रादौ । गोपिका-विदुर- धर्मव्याधादीनामपि प्रागेव प्राप्तोपायानां प्रारब्धविशेषेण निकृष्टशरीरप्राप्तिः । विद्यायोनिशरीमेव त्रैवर्णिकशरीरमिति निर्बन्धः । प्रारब्धावधिकत्वाद् बन्धस्य विदुरादिभिः तादृशं शरीरान्तरं गृहीतम् इति ।।

**मोक्षसाधनविद्याभेदः**

विद्याः द्वात्रिंश्त्सङ्ख्याकाः प्रसिद्धा दहर- शाण्डिल्यादिरूपाः। तासां फलं समानम् । अतः विकल्पः । "विकल्पोऽविशिष्टफलत्वात्।' इति सूत्रानुरोधात् । न्यासविद्याऽपि तदन्तर्गता । सा अध्यासविशेषविशिष्टा । अध्यासविशेषश्च रक्षकत्वविषयकः । न्यासविद्या "ज्ञानस्वरूपा,"अतः "नान्यः पन्था विद्यते' इति श्रुत्या अविरोधः ।।

अत्र भक्तिप्रपत्योः साधनत्वं केचिन्नांगीकुर्वन्ति । तथाहि - "विकल्पो विशिष्टफलत्वा"दिति सूत्रे विकल्पेन मोक्षहेतुत्वेनोक्तानां दहरादिविद्यानामधिकाल्पगुणविषयत्वेन तारतम्याच्च। प्रत्येकं मोक्षहेत्वोर्निरन्तरचिन्ताभरन्यास-रूपयोः भक्तिप्रपत्त्योः स्वरूपतः कर्मापेक्षानपेक्षाभ्यामावृत्त्याना- वृत्तिभ्यां च विषमत्वाच्च। न च तयोरुक्तरीत्याधिकाल्पत्वेऽपि विश्वासाल्पत्वाधिक्याभ्यां साम्यमिति वाच्यम्। विश्वासस्यावर्तनीयायां भक्तावेव यावदावृत्त्यपेक्षितत्वेनानावर्तनीयप्रपत्तितोऽधिकत्वात्। यदि च फलसाम्येन साधनसाम्यार्थं प्रपत्तावधिकविश्वासः कल्प्येत, तर्ह्यन्योन्याश्रयः। साधनवैषम्येऽपि साध्यसाम्ये चाधिकविधात्र्याः श्रुतेरनुपादेयत्वं फलदातुरीश्वरस्य वैषम्यादिकं च स्यात्। न च देवमनुष्यादीनां तत्र शक्त्यशक्तिमात्रेण शक्ताशक्तानुष्ठित नित्यकर्मण इव न फल वैषम्यमिति वाच्यम्। अशक्तार्जितस्य ज्ञानस्यान्धपंग्वादिकृतकाम्यकर्मण इव विकलत्वेन काम्यमोक्षसाधनत्वायोगेन तत्साधनत्वाय स्वोचितमुक्तिफलं प्रत्यविकलताया वक्तव्यत्वात्।।

एतेन भक्तिप्रपत्त्योर्विषमत्वेऽपि शक्ताशक्तविषयत्वात्फलसाम्यमिति निरस्तम्, तथाऽश्रवणात्। कल्पने चातिप्रसङ्गात्। तस्मात्साधनतारतम्यान्मुक्तितारतम्यम्। अत एव-

कर्मणामल्पमहतां फलानां च स्वगोचरे।
विभागस्थानसामान्यादविशेषेऽपि चोदितः।।

इति वार्तिकेनाविशेषेण स्वर्गसाधनत्वेन श्रुतयोरपि ज्योतिष्टोमाग्निहोत्रयोस्तारतम्यात्तत्साध्ये स्वर्गेऽपि तदुक्तम्। उक्तं च-

युक्तं च साधनाधिक्यात्साध्याधिक्यं सुरादिषु।
नाधिक्यं यदि साध्ये स्यात् प्रयत्नः साधने कुतः।। इति॥

**सहायकग्रन्थाः**


1. (वे.स. १६०)
2. (न्या.सि.२१९)
3. (३.२.१ पू.मी.)